# उपसंहारः

# अथोपसंहाराध्यायः

**प्रयोजनानुसारेण विकासं संहृतिं यथा।**
**विवेकी कुरुते कूर्मस्तथैव ग्रन्थकृत्सुधीः।।**

कविताकोमलपदावलीनिवेशनपटुः, ज्यौतिषशास्त्रज्योतिर्ज्वनोज्ज्वलः वास्तुवस्तुविन्यासविचक्षणः बृहत्संहितारचनारम्भे ग्रन्थकारः आदित्याङ्कः आचार्यवराहमिहिरः सम्यगाह शास्त्रोपनयनाध्याये–

यद्यपि शास्त्रमिदं पितामहो ब्रह्मदेवः स्वदिव्यवर्णैः क्षितितनयदिवसवारः .... " इत्थं वचनम् उपनिबबन्ध, साम्प्रतिकः मादृशः वराहमिहिरः कुजदिनम् अनिष्टम् इति पदगुम्फनं कृतवान् , शास्त्रनिरूपण तु एकता अस्ति। अतः स्वनूतनग्रन्थनिर्माणे न कोऽपि बाधः इति कृत्व। अयं विद्वान् बृहत्संहितारव्यं प्रौढं ग्रन्थरत्नं व्यरीरचत्।

ग्रन्थेऽस्मिन् ज्यौतिषशास्त्रं वास्तुशास्त्रम् इति परस्परसम्बन्धं शास्त्रब्दयं समाविष्टं दृश्यते। अत्र १०८ अध्यायः आहत्य भवन्ति। मया स्वकीये शोधप्रबन्धे तेषां विभाजनं नवसु सोपानेषु कृतम्। यथा क्रमशः सोपानम् आरोहन् उपरि उपरि रीत्या सर्वोच्यभूमिकां प्राप्नोति तथैव ग्रन्थस्य अस्य अध्ययनं कुर्वन विद्यापिपासुः क्रमशः स्वंज्ञानं लभते। तथा हि–

अस्य ग्रन्थस्य दैवी परम्परा अस्ति। प्रथममुनिः विधाता चतुराननः ब्रह्मदेवः इदंप्रथमतया ज्यौतिष-वास्तुशास्त्रविषयकं यद् ज्ञानं प्रतिपादयापास,तत् सर्वम् अवलेक्य ग्रन्थकारः अमुं ग्रन्थं व्यरचयत्। आदौ जगतः उत्पत्तिविषये निरूपणम् अस्ति सृष्टेः प्राक् सर्वं किल तमोमयम् आसीत्। आदौ जलसृष्टिः जाता तत्र तेजोमयम् अण्डं समुत्पन्नम्। तस्य अण्डस्य भागब्दयम् अजनिष्ट स्वर्गः, भूमिश्च। ततः सूर्याचन्द्रमसौ जातौ पितामहस्य द्वे नेत्रे सूर्यचन्द्रौ। स ब्रह्मदेवः शास्त्रमिदं प्रथमतया उपदिदेश।

अस्य शास्त्रस्य आदिप्रवर्तकः सूर्यः अस्ति इति आख्यायिका बृहत्संहितायाः प्रथमाध्याये एकादशे श्लोके प्रदत्ता बीजरूपेण। तस्याः विस्तरः टीकाकृता भट्टोत्पलेन निरुपितः।

पुरा किल हिमालये भगवन्तं पराशरम् ऋषिं मुनिः विश्वामित्रः उपेयिवान् नम्रतया च पृष्टवान् भगवन् अस्माभिः सूर्यविषये श्रुतम्। सः एकः एव, तस्य द्वादश भेदाः कथं जाताः? प्रत्युत्तरं ददत् पराशरः आह– पुरा जनानां सात्विकभावः अधिकः आसीत्, तमोभावश्च अल्पः। किन्तु दिने दिने जनेषु आलस्यम्, मन्दता, शास्त्रव्यासंगरहितता जाता। तेषु पुनः तेजः

आधातुं भगवान् सूर्यः आत्मानं द्वादशधा विभक्तंवान्- इन्द्रः , विष्णुः, विवस्थान् अंशुमान धाता, त्वष्टा, पूषा, वरुणः, अर्यमा, भगः, सविता च।

प्रत्येकाध्यायस्य विषयानवलोक्य अनेन क्रमेण विश्लेषणं क्रियतेऽत्र।

(नासदीयसूक्तसमानं)[1] इत्यादिभिः पद्यैः प्रपञ्चोत्पत्तितः आरभ्य विविधान् विषयान सोदाहरणं विवृणोति आचार्यः। दैवज्ञलक्षणम्, आदित्यचारम् इत्यारभ्य सप्तर्षिचारपर्यन्तं विविधग्रहाणां नक्षत्राणां च चारफलविवरणं क्रियते।

ग्रहणविषये (राहुचारे)। अध्यायसङ्ख्याविषये। वातचक्रं, रजोलक्षणम्, नक्षत्रजातकम्, शास्त्रानुक्रमणी, अङ्गविद्या, पिटकाध्यायः विवाहपटलः , इत्यादयः प्रक्षिप्ताः इत्येव वि. सुब्रह्मण्यशास्त्रिणः[2] अभिप्रायः।

१. उपोद्घातः- विषयप्रवेशः उद्देश्यञ्च।

२. दैवज्ञलक्षणम् - ज्यौतिषिकः कीदृशो भवेदति स्पष्टता तथैव तस्यश्रेष्ठता, आवश्यकता च निरुपितास्ति।

३. आदित्यचारः -

४. चन्द्रचारः -

५. राहुचारः- ग्रहणफलम्

६. कुजचारः -

७. बुधचारः -

८. बृहस्पतिचारः -

९. शुक्रचारः -

१०. शनिचारः -

११. केतुचारः -

१२. अगस्त्यचारः -

१३. स्पतर्षिचारः -

(४–१३:) एतेषां ग्रहाणां नक्षत्राणां च गतिविगतयः तद्द्वारा प्रकटिताः परिणामाः च एषु अध्यायेषु निबद्धा : सन्ति। ग्रहणस्यआपि परामर्शः राहुचारे प्रदत्तोऽस्ति।

१४. कूर्मविभागः - नक्षत्राणि भारतभूम्यां केषु स्थानेषु विद्यन्ते, तेषां प्रभावश्च वर्ण्यते।

---

१. ऋ.वे. - नासदीयसूक्तम् - ८/७/१७

२. बृ.सं. डा.कृष्णचन्द्रद्विवेदी उपोद्धाते।

१५. नक्षत्रव्यूहः - एकैकनक्षत्राधीने के के भवन्ति इति विवृतमस्त्यत्र।

| | | |
|---|---|---|
| कृत्तिका | - | श्वेतपुष्पम् |
| रोहिणी | - | कृषिः |
| मृगशिरः | - | पुष्पं, फलम्, पत्रम् |
| आर्द्रा | - | तुषधान्यम् |
| पुनर्वसुः | - | उत्तमधान्यानि |
| पुष्यम् | - | यवः, गोधूमः, शाली, इक्षु, वनानि |
| अहिदेवः/ आश्लेषाः | - | कन्दफलमूलानि तुषधान्यानि |
| मधा | - | पर्वताश्रयिणः |
| पूर्वाफल्गुनी | - | कार्पासः , लवणम्, मधु, तैलम् |
| उत्तराफल्गुनी | - | शोभनधान्यानि |
| हस्त | - | तुषधान्यम् |
| चित्रा | - | शाल्यादिधान्यानि |
| स्वातिः | - | वातधान्यानि |
| विशाखा | - | रक्तपुष्पाणि, फलशाखिनः, तिलमुद्गाः , कार्पासः, माषः, चणकः |
| अनुराधा | - | शरत्कालिकद्रव्याणि |
| ज्येष्ठा | - | द्रव्याणि |
| मूलम् | - | भेषनिः |
| पूर्वाषाढम् | - | वारिकुसुमानि (अम्बुजादयः ) |
| उत्तराषाढम् | - | स्थावरद्रव्याणि |
| श्रावणम् | - | वनस्पतयः |
| घनिष्ठा | - | वनस्पतयः |
| शतभिषक् | - | जलद्रव्याणि |
| पूर्वभाद्रपदा | - | सस्यानि |
| उत्तराभाद्रपदा | - | सारधान्यानि |
| रेवती | - | सलिलजफलकुसुमानि, अब्जम्, सुरभिकुसुमानि, गन्धा |
| अश्विनी | - | ओषधयः |
| भरणी | - | तुषधान्यानि |

१६. ग्रहभक्तिः प्रत्येकं ग्रहस्य अधीने विद्यमानानां विवरणमत्र लभ्यते। विभिन्नसस्यानां नाथाः के इति चित्रेऽस्मिन् वर्ण्यते। स्थानानि, जनविभागः, रोगः एवं विविधवर्णानां स्वामित्वं / प्रभवः केषां ग्रहाणामिति विवरणमत्र वर्तते। एतेषां ग्रहाणां शक्त्याधारेण उदयाधारेण वा वृक्षलतादयोऽपि वृद्धि- क्षयमाप्नुवन्ति। तथैवेतेषां मिथो बन्धोऽपि स्यात् - पूजादिषु एतदनुसृत्यैवोक्तानि उपयुज्यन्ते। नक्षत्राणां लक्षणानि , उल्कापातः भूकम्पः इत्यादयः आधुनिकवैज्ञानिकानामपि उपयोगप्रदाः विषयाः निरूपिताः वर्तन्ते ग्रन्थेऽस्मिन्। विशेषतया कथं वा कदा वा भूकम्पः भवति, इत्यादिविवरणानि आधुनिकवैज्ञानिकानामपि पठनाय साहाय्यं विदधते।

१७. ग्रहयुद्धम् - एकस्मिन्नेव राशौ वर्तमानानां ग्रहनक्षत्राणां प्रभावादि विषया अत्र निरुपिताः।

१८. चन्द्रग्रहसमागमः चन्द्रस्य गतिहेतुना अन्यग्रहनक्षत्राणां सम्बन्धे किं किं भवितुमर्हति इति अस्य अध्यायस्य विषयः।

१९. ग्रहवर्षलक्षणम् - दिन- सप्ताह- मास -वर्षाणाम् अधिपतिरूपेण के ग्रहाः भवन्ति, तेषां परिणामाः के इत्यस्मिन्नध्याये विवृतमस्ति।

२०. ग्रहश्रृङ्गाटकः ग्रहाणां विविधयोग- रचनाः परिणामाः। गोलक्षणम्, श्वलक्षणम्, कुक्कुटलक्षणम् , गजलक्षणम्, अश्वलक्षणम् इत्येतादृशोभिः मृगपक्षिणां लक्षणैः सह पुरुषलक्षणमं, स्त्रीलक्षणं, पञ्चमहापुरुषलक्षणम् एवं विधं मानवानामपि रूपस्वभाव- गुण- दोषचिन्तनानि यानि कृतानि वर्तन्ते तानि सर्वाणि (Management Science) उपयोगाय भवितुम् अहन्ति। ये विषयाः विविधेषु अध्यायेषु वर्णिताः इति उपसंहारे स्वयं वराहमिहिराचार्येण एवं सङ्गृहीतं भवति।[१]

२१. गर्भलक्षणम् - अन्नं जगतः प्राणाः ......... जगतः जीवनस्य आधारः अन्नं भवति। अतः कृषिविषये ज्ञानम् अनिवार्यं भवति। अस्मिन् अध्याये वृष्टेः लक्षणानि सविस्तरं प्रतिपाद्यन्ते। वननिरीक्षकाणां वैज्ञानिकानां वृष्टि- वातावरण- परामर्शकानां कृते अयं विषयः अत्यन्तं महत्त्वभूमः। मेधाः कदा भवन्ति, वर्षन्ति , कियत् वा वर्षन्ति इत्यादीनाम् ऊहार्थं ग्रहनक्षत्राणां स्थितिरवगन्तव्यैव।

---

१. अध्यायस्यान्ते दत्तमस्ति।

२२. गर्भधारणम् - वृष्टे : शक्तिः , तस्य परिणामश्च वर्ण्यते। अयं भागः (४-८ श्लोकाः) वसिष्ठसंहितान्तर्गणोऽस्ति।[1]

२३. प्रवर्षणम् - वृष्टे : मापनम् कदा वृष्टे : कालानुसारं परिणामश्च अध्यायेऽस्मिन् चर्चितः।

२४. रोहिणीयोगः चन्द्रस्यः रोहिणीनक्षत्रस्य च योगः तत्परिणामश्च अध्यायस्यास्य प्रतिपाद्य विषयः।

२५. स्वातियोगः स्वाति- आषाढयोः चन्द्रस्य परिणामश्च।

२६. आषाढीयोगः - आषा्ढमासस्य विशेषताः, सर्वस्य बीजानि आषाढपौर्णमास्यां तुलायां तोलयित्वा कृषिवृद्धिमवगन्तुं शक्यत इति वदति ग्रन्थकारः। तदर्थं केचन मन्त्राः विधयश्च वर्तन्ते।

२७. वातचक्रम्- वायोः गतिं वीक्ष्य परिणामनिर्धारणम्।

२८. सद्योवृष्टिलक्षणम् - वृष्टि : कदा कथं भवति इति विचारणम्।

२९. कुसुमलता- वृक्षाणां पुष्पाणि फलानि च दृष्ट्वा द्रव्यसुलभतायाः सस्यनिष्पत्ते : च पूर्वज्ञानं कथमिति चित्रीक्रियतेऽत्र।

३०. सन्ध्यालक्षणम् - सन्ध्यायाः वातावरणावलोकनेन परिणामदर्शनं कथमिति लक्ष्यतेऽत्र।

३१. दिग्दाहलक्षणम् - विविधदिक्षु दृश्यमानस्य रक्तादिवर्णस्य फलं विव्रियतेऽत्र।

३२. भूकम्पलक्षणम् - भूकम्पस्य हेतुः कः ? परिणामः कः ? इत्यादि विचार्यतेऽत्र।

३३. उल्कालक्षणम् - उल्कानां स्वरूपं, पतनेन ,दर्शनेन च किं भवितुमर्हति इति परिचर्च्यते।

३४. परिवेषलक्षमण् - सूर्यचन्द्रादिषु दृश्यमानस्य प्रभावलयस्य वर्णनं, हेतुः, परिणामश्च।

३५. इन्द्रचापलक्षणम् - आकाशे इन्द्रचापः इति उच्चमानः वर्णविन्यासः कथं भवति ? तेन कः परिणामः? इत्यादीनां विवरणम्।

३६. गन्धर्वनगरम् - आकाशे विविधवर्णरूपैः नगरमिव दृश्यमानस्य गन्धर्वपुरं, गन्धर्वनगरम् इति अभिज्ञानयुक्तस्य परिणामः।

३७. प्रतिसूर्यलक्षमण् - सूर्यस्य प्रतिरूपदर्शनस्य फलानि।

---

१. वासिष्ठसंहिता -गर्भधारणंअध्याये-शो. ४-८

३८. रजोलक्षणम् - अन्तरिक्षे धूलिः तदा तदा दृश्यते , तस्य अवलोकनेन भविष्यम् ऊहितुं शक्यते।

३९. निर्घातलक्षणम् - आकाशे पवनयोः घट्टनस्य परिणामाः समयस्थानभेदेन।

४०. सस्यजातकम् - सूर्यस्य विविधराशौ वर्तनेन सस्येषु जायमाना वृद्धिक्षयादेः विवरणम्।

४१. द्रव्यनिश्चयः - प्रत्येकं राशिरपि एकैकद्रव्यस्य अधिपतिः भवति। अस्याधारेण शुभाशुभविचारणम्।

४२. अर्घकाण्डम् - पदार्थानां मूल्यज्ञानाय उपायः।

४३. इन्द्रध्वजलक्षणम् - इन्द्रध्वजेतिहासः तस्य निर्माणं , पूजा, वन्दनाक्रमः परिणामश्च। वृक्षपूजा अपि अस्मिन् वर्तते। अनेन पूर्वकाले पर्यावरणसंरक्षणे , प्रकृतिरक्षणे कीदृशी आस्था आसीदिति ज्ञायते।

४४. नीराजनम् - एकं शुभकर्म। सर्वजीवजालानां निमित्तं एतत् कर्म अनुष्ठातव्यम्।

४५. खञ्जनदर्शनम् - 'खञ्जरीटस्तु खञ्जनः' - अमरकोशे। एतस्य पक्षिणः दर्शनेन स्म्भाव्यामानानां परिणामानां विवरणम्।

४६. उत्पातलक्षमण् - गर्गमहर्षिणा विस्तारितस्य अत्रिमहर्षि प्रोक्तस्य प्रकृताः विपरीतस्वभावानां सङ्ग्रहोऽत्र दृश्यते। सस्येषु सम्भाव्यमानानां विकृतीनां परिणामानां च आलोचना अत्र अस्ति।

४७. मयूरचित्रकम् - ग्रह नक्षत्राणां गतिविगतयः।

४८. पुष्यस्नानम् - दोषनिवारणाय राज्ञा करणीयं विशेषशान्तिकर्म, ओषधीनाम् उपयोगश्च वर्ण्यते।

४९. पट्टलक्षणम् - महाराजस्य मस्तके विद्यामानकिरीटम्।

५०. खड्गलक्षणम् - खड्गस्य आधारेण विविधलक्षणानि उच्यन्ते। तीक्ष्णतावर्धनार्थं करणीया क्रिया तदर्थमुपयोक्तव्यनि वस्तूनि च लिख्यन्ते।

५१. अङ्गविद्या - एषः विषयः केषुचित् ग्रन्थेषु न दृश्यते। परन्तु टीकाकारेण भट्टोत्पलेन एतस्य व्यख्या कृता दृश्यते। प्रश्नस्य स्थानं, शुभाशुभ निमित्तानि च मुख्यविषयाः।

५२. पिटकलक्षणम् - एष विषयोऽपि सर्वग्रन्थेषु न विद्यते। शरीरे विद्यमानानां पिटकानां गुणावगुणाः विमृश्यन्तेऽत्र।

५३. वास्तुविद्याः वास्तुसिद्धान्तः तस्याधारेण विविधगृह- मन्दिराणां गणना, भवनस्य विविधस्थानांना गुण- दोषाः , वृक्षलतादीनां वर्धनस्य शुभाशुभचिन्तनं च इतिवृत्तम्। नगरं , भूमि, गृहं .... सर्वेषां काचित् गणना भवेदिति लक्षणोपेतं वर्ण्यते।

५४. उदकार्गलम् - जलसान्निध्यज्ञानार्थं मार्गाः। विशिष्य, विविधानां वृक्षाणां स्थितिः जललक्षणाय कथं सहयोगी भवतीति सूच्यते। सारस्वतमुनेः सारस्वतमतम् , मानवमतम् (मनोग्रन्थः) एवं विविधमतानुसारं विवरणमस्ति। १०० तमश्लोकात् कूपलक्षणम् (मानवग्रन्थाधारेण), शिलाभञ्जनाथ मार्गाः, पर्णानां रसः जलशुद्धिकरणमार्गाः औषधप्रयोगः च अत्र वर्तन्ते। दकार्गलमित्यपि अस्य नामान्तरं वर्तते। 'नारं नीरं भुवनमुदकं जीवनीयं दकं च'-(हलायुधकोशः)।

५५. वृक्षायुर्वेदः वृक्षाणां प्राधान्यं, कृषेः केचन प्रकाराः रसायनानां निर्माणविधिः , भूमिविभागः , बीजाङ्कुरणम् इत्येवं विषयाः।

५६. प्रासादलक्षमण् - देवालयस्थानं, निर्माणं , महत्त्वम् इत्यादि प्रतिपाद्यते।

५७. वज्रलेपलक्षणम् - ८ श्लोकेषु वज्रसमानः लेपः कथं निर्मातव्यः इति, विविधसस्यानां भागाः , द्रव्यानि च अस्मिन् कार्ये उपयुज्यन्ते।

५८. प्रतिमालक्षणम् - परमाणुः इत्युक्ते किम्? , अत्यन्तं सूक्ष्ममापनम् , प्रतिमाया : गणना विविधमूर्तीनां प्रतिमाभेदाः शुभाशुभत्वं च विस्तरेणात्र प्रतिपादितमस्ति।

५९. वनप्रवेशः वृक्षनिमित्तं , वृक्षपूजा च।

६०. प्रतिमाप्रतिष्ठापनम् - प्रतिमायाः प्रतिष्ठा।

६१. गोलक्षणम्
६२. श्वलक्षणम्
६३. कुक्कुटलक्षणम्
६४. कूर्मलक्षणम्
६५. छागलक्षणम्
६६. अश्वलक्षणम्
६७. गजलक्षणम्

] विविधमृगाणां शुभाशुभलक्षणानि विवृतानि सन्ति।

६८. पुरुषलक्षणम्
६९. पञ्चमहापुरुषलक्षणम्

] पुरुषाणां, महिलानां तथा महापुरुषाणां

७०. स्त्रीलक्षणम् लक्षणं च सविस्तरं प्रतिपादितमत्र।

७१. वस्त्रच्छेदलक्षणम् - वस्त्रं छिद्यते तर्हि किं किं भवितुमर्हति ?

७२. चामरलक्षणम् महाराजस्य छत्रचामराणां लक्षणानि

७३. छत्रलक्षणम् शुभाशुभत्वं च विवृतमस्त्ययत्र।

७४. स्त्रीप्रशंसा - स्त्रीणां महत्त्वं वर्णितमस्ति।

७५. सौभाग्यकरम् - परोपकारप्रशंसा, परनिन्दावर्णनं च कीर्तयत्यत्र।

७६. कान्दर्पिकम् - वाजीकरणौषधविषये अध्येऽस्मिन विवरणं वर्तते। (रसायनविधिः)

७७. गन्धयुक्तिः- केशस्य पलितत्वनिवारणौषधम्, धूमानां निर्माणम् च। कोस्मेटीक्स, प्राकृतिक / जैवगन्धादीनां निर्माणम्।

७८. स्त्रीपुरुषमायोगः - जनानं स्वभावः लक्षणानि च।

७९. शय्यासनलक्षणम् - कीदृशैः काष्ठैः क्रियमाणा शय्या कीदृशगुणयुक्ता भवेत् तस्य उपयोगः प्राप्यमाणानिः शुभाशुभानिः इत्यादि वर्ण्यन्तेऽत्र।

८०. वज्रपरीक्षा

८१. मुक्तफलपरीक्षा वज्रं, मुक्ताफलं, पद्मरागं, मरकतम्

८२. पद्मरागपरीक्षा इत्यादीनां प्राप्ति, धारणेन कः लाभः .........................

८३. मरक्तपरीक्षा एवं विवरणं लभते एतस्मात् अध्यायात्।

८४. दीपलक्षणम् - दीपं दृष्टवा किं लक्षणं वक्तुं शक्यते इति विवरणम्।

८५. दन्तकाष्ठलक्षणम् - विविधानां दन्तकाष्ठानाम् उपयोगेन अनुभूयमानानां गुणावगुणानां वर्णनम्।

८६. शकुन - मिश्रफलम् - विविधशास्त्रज्ञानां मतानि सङ्गृह्य शकुनफलं विवृणोत्यस्मिन्नध्याये।

८७. शाकुने - अन्तरचक्रम् - ३२ स्थानानाम् आधारेण शकुनानां विशिष्य शकुनब्दानाम् फलं निरुप्यतेऽत्र।

८८. शाकुने - शकुनेरुतम् - विविधजन्तूनां शब्दानां परिणामः

८९. शाकुने श्वचक्रम्।

९०. शाकुने - शिवारुतम् - शृगालस्य शकुनफलम्।

| | |
|---|---|
| ९१. शाकुने- मृगचेष्टितम्<br>९२. शाकुने - गवेङ्गितम्<br>९३. शाकुने - अश्वचेष्टितम्<br>९४. शाकुने - गजेङ्गितम्<br>९५. शाकुने - काकचरित्रम् | एतेषां मृगाणां निमित्तेन भविष्यतां सम्पत्समानानां फलानां निरूपणम्। |

९६. शाकुने - उत्तराध्यायः -कथं शकुनं दृष्ट्वा फलं वक्तव्यमिति विव्रियते।

९७. पाकविचारः - विविधफलानाम् अनुभवः कथं कियत्कालं यावत् भवेदित्यादि सूच्यते।

९८. नक्षत्रगुणः अश्वत्थादिनक्षत्राणां गुणदोषाः तेषु नक्षत्रेषु करणाकरणानि कानि इत्यादि निरुप्यतेऽत्र।

९९. तिथिकरणगुणः - तिथीनां देवताः, करणानाम् अधिपाः तेषां प्रभावश्च विव्रियतेऽत्र।

१००. वैवाहिकनक्षत्रलग्ननिर्णयः।

१०१. नक्षत्रजातकम् - नक्षत्रादिषु जन्म प्राप्तवतां लक्ष्णानि।

१०२. राशिविभागः।

१०३. विवाहपटलम् - विवाहसमयग्रहस्थितिफलानि।

१०४. गोचरफलम् - ग्रहचारफलम् - विभिन्नग्रहाणां विविधपरिणामाः उच्यन्तेऽत्र।

१०५. नक्षत्रपुरुषव्रतम् - नक्षत्रसम्बन्धिव्रतम् - तस्य रीतिफलादयः।

१०६. उपसंहारः - सम्पूर्णग्रन्थविषयान् स्मृत्वा उपसंह्रियते।

एवं १०० अध्यायेषु २७०० श्लोकैः बहवः विषयाः सोदाहरणं, परन्तु अल्पशब्दैः सुन्दरशैल्या कवितासौकुमार्येण च सङ्गृहीताः सन्ति अस्मिन ग्रन्थे। ज्योतिश्शास्त्रसमुद्रप्रमथ्य मतिमन्दराद्रिण च मया।

बृहत्संहितायां बहवः विषयाः वर्तन्ते इति वयं जानीमः। तेषु वनस्पतिसम्बन्धाः विषयाः अत्र विश्लेषणाय निरूप्यन्ते। नक्षत्रव्यूहः, ग्रहभक्तिः, कुसुमलता, सस्यजातकम्, द्रव्यनिश्चयः, अर्घकाण्डः, इन्द्रधवजसम्पदः, नीराजनम्, उत्पातलक्षणम्, प्रासादलक्षणम्, उदकार्गलं, वृक्षायुर्वेदः, वास्तुविद्या, प्रतिमाप्रतिष्ठापनं, वज्रलेपनलक्षणम्, शय्यासनलक्षणम्, मुक्तफललक्षणम्, गन्धयुक्तिः, कान्दर्पिकम्, दन्तकाष्टलक्षणं, वनप्रवेशः ... इत्यादिषु अध्यायेषु वनस्पतिम्बन्धाः विषयाः ये सन्ति तान् अनुबन्धे दीयन्ते। प्रत्येकं वृक्षस्य वा सस्यस्य स्थितिं

दृष्ट्वा बहूनां भौतिककार्याणां विषये ऊहां कर्तुं शक्यते, निर्णयं च कर्तुं शक्यम् इति ग्रन्थकारः वदति।

**ज्योतिः शास्त्रसमुद्रं प्रमथ्य मतिमन्दराद्रिणाऽथ मया।**

**लोकस्यालोककरः शास्त्रशशाङ्कःसमुत्क्षिप्तः।।१ ।।**

ज्योतिः शब्देन प्रधाननक्षत्राण्युच्यन्ते। ज्योतिषांशास्त्रं ज्योतिःशास्त्रम्। तदेव दुर्विज्ञेयत्वात् समुद्रं सागरम्। मतिमन्दराद्रिणा,मतिर्बुद्धिरेव मन्दरः पर्वतः, तेन मतिमन्दराद्रिणा प्रमथ्य निर्मथ्य लोकस्य जगतः आलोककरः प्रकाशकरः, शास्त्रशशाङ्कः शास्त्रचन्द्रः समुत्क्षिप्त उद्धृतः।

अन्यत् प्रतिपादयितुमाह-

**पूर्वाचार्यग्रन्था नोत्सृष्टाः कुर्वता मया शास्त्रम्।**

**तानवलोक्येदं च प्रयतध्वं कामतः सुजनाः।।२ ।।**

पूर्वोक्तानि यानि शास्त्राणि तानि न सन्त्यक्तानि। तान्येव दृष्ट्वा सर्वथा संक्षेपेण सुर्वत्तैः कृतम्। तान् पूर्वाचार्योक्तान् इदं मदीयं च शास्त्रमवलोक्य दृष्ट्वा कामतो यथेच्छं सुजनाः साधवो बुधाः प्रयतध्वम्। यच्छोभन तदेव ग्राह्यामत्यर्थः।

अधुना सज्जनानां दुर्जनानाञ्च चेष्टितमाह-

**अथवा कृशमपि सुजनः प्रथयति दोषार्णवाद् गुणं दृष्ट्वा।**

**नीचस्तद्विपरीतः प्रकृतिरियं साध्वसाधूनाम्।।३ ।।**

अथवा सुजनः प्रधानजनो दोषार्णवाद् दोषसागरात् कृशमपि स्वल्पमपि गुणं दृष्ट्वा तमेव प्रथयति प्रख्यापयति, दोषान् प्रच्छादयति। नीचस्तद्विपरीत इति। नीचो गुणसागरात् स्वल्पं दोषं दृष्टवा गुणान् प्रच्छाद्य तमेव दोषं प्रख्यापयति। इयं स्वाध्वसाधूनां सज्जनदुर्जनानां प्रकृतिः स्वभाव इति।

काव्यमभिनवं सर्वथा दुर्जनानां प्रदर्शयितव्यमित्येतत् प्रतिपादयितुमाह-

**दुर्जनहुताशतप्तं काव्यसुवर्णं विशुद्धिमायाति।**

**श्रावयितव्यं तस्माद् दुष्टजनस्य प्रयत्नेन।।४ ।।**

दुर्जनहुताशेन दुर्जनाग्निना काव्यसुवर्णं काव्यमेव सुवर्णं तप्तं तापितं विशुद्धिं निर्मलतामायाति प्राप्नोति। यथा कनकं वह्नितप्तं शुद्धं भवत्येवं दुर्जनमुखपतितं काव्यं शुद्धं

भवति। यतः स दोषतत्परो भवति, न गुणग्राही। तस्मात् प्रयत्नेन दुष्टजनस्य दुर्जनस्य काव्यं श्रावयितव्यं प्रदर्शनीयमिति।

अधुना विदुषः प्रार्थयन्नाह-

**ग्रन्थस्य यत् प्रचरतोऽस्य विनाशमेति**

**लेख्याद् बहुश्रुतमुखाधिगमक्रमेण।**

**यद्वा मया कुकृतमल्पमिहाकृतं वा**

**कार्यं तदत्र विदुषा परिहृत्य रागम्।।५।**

अस्य ग्रन्थस्य प्रचरतः प्रचरमाणस्य यद्विनाशमेत्यपशब्दतां गच्छति। लेख्याद् लेखकदोषाद् बहुश्रुतमुखाधिगमक्रमेण बहुश्रुता ये जनास्तन्मुखेभ्योऽधिगमः प्राप्तिस्तस्य क्रमेण परिपाटया पूर्वापरपर्या-लोचनयाऽर्थासङ्गोत्पत्तेर्येऽपशब्दं जानन्ति। तदत्रास्मिन् शास्त्रे विदुषा रागं परिहृत्य कार्यम्। तन्मुखेभ्योऽधिगम्य विदुषा पण्डितेन रागं मात्सर्यं परिहृत्य त्यक्त्वा कार्यं कर्तव्यम्। तथा यद्वा मया कुकृतं कुत्सितमनागमेन कृतं विरचितमल्पं वा परिमितमव्यापकं कृतं वा इहास्मिन् शास्त्रे मूलादेवाकृतं यन्न कृतं तदत्रास्मिन् शास्त्रे विदुषा रागं परिहृत्य कार्यमिति।

सतां प्रणामपूर्वकाणि शास्त्राणि प्रमाणितानि भवन्त्येतदेव प्रदर्शयन्नाह-

**दिनकरमुनिगुरुचरणप्रणिपातकृतप्रसादमतिनेदम्।**

**शास्त्रमुपसङ्गृहीतं नमोऽस्तु पूर्वप्रणेतृभ्यः।।६ ।।**

दिनकर आदित्यः। ताराभाः सर्व एव ग्रहाः। मुनयो वसिष्ठादयः। गुरुरादित्यदासाख्यः स्वपिता। दिनकरमुनिगुरुणां चरणाः पादाः। तेषां प्रणिपातो नमस्कारः। तत्कृतात् तत्करणाज्जातः प्रसादोऽनुग्रहो यस्ततो मतिर्बुद्धिर्यस्य तेन दिनकरमुनिगुरुचरण-प्रणिपातकृतप्रसादमतिना मयेदं शास्त्रं ज्यौतिषग्रन्थ-मुपसङ्गृहीतं संक्षिप्तीकृतम्। तस्मात् तेभ्यः पूर्वप्रणेतृभ्यः पूर्वाचार्येभ्यो नमोऽस्तु नमस्कारो भवतु।

सामान्यतः भवननिर्माणमुपयुक्ता भूमिः वास्तुशब्देन ज्ञायते। वास्तोः अन्तर्गतं न केवलं भवनम् अपि तुं प्रतिमा मन्दिरं, ग्रामः पुरम्, मार्गः, सरोरवः वापी कुंपत्तडागादिकं तथा मण्डपः, शयनम् यानम्, -उद्यानम् इत्यादीनां संशोधनं निमार्णं जीणोद्धारः इत्यादिकस्य समावेशो भवति। यत्र मर्त्याः तथा च अमराः वसन्ति इति वास्तुः।

वास्तुविद्या तथा समरांङ्गणसूत्रधारग्रन्थे तदतिरिक्तं वास्तोः अधिकं त्यायकंक्षेत्रं दर्शितम्। वस्तुतः किमपि निर्मितं वस्तु इति वास्तुः वर्तते। भारतीयवास्तुशास्त्रीयदृष्टचा समस्तः भूमण्डलं स्थापत्यस्य प्रतिपादनमस्ति।वास्तुविद्याः मुख्यविशेषज्ञौ विश्वकर्मा मयश्च वर्तते। मत्स्यपूराणानुसार वास्तुपाणेतारः अष्टादश परिगणिताः। तथा च अन्येषु पुराणेषु वास्तुशास्त्रीयग्रन्थेषु च विविधा अन्ये अपि वास्तुशास्त्रप्रवर्तकाचार्याः परिगणिताः वर्तन्ते।

मनुष्याणां जीवने वास्तुशास्त्रस्य तथा पञ्चतत्त्वानामतीव महत्वं वर्तते। पञ्चतत्वानामाधारेण, वास्तुशास्त्रपदमण्डलानामाधारेण दिशायाः आधारेण वास्तुशास्त्रीय-सिधान्तः वर्तन्ते। तेषां सजीवाना जीवने प्रत्यक्षः सम्बन्धः वर्तते। तेषां प्रभावः मानवजीवने प्रत्येकक्षणे भवति।

तन्न प्रासादे ग्रामे मंन्दिरे उद्यान वृक्षारोपणे, आयुर्वेदो नगरे मूर्तिकला निर्माणे भुवने गृहे जनाः चिरकालपर्यन्तं सर्वप्रकाराणां समृद्धि तथा सुख-ऐश्वये तथा सुखानामुपभोगमं तथा दीर्धायुप्राप्ति कुर्वन्ति।

अस्माकं वास्तुज्यौतिषशास्त्रीयग्रन्थेषु मन्दिर प्रतिमा निर्माणा विविधेषु देवानंा प्रतिमां निर्माणा तथा वृक्षारोपणस्य तथा जलाशयनिर्माणस्य अतीव महत्व प्रतिपादितमस्ति। कस्यापि मन्दिर प्रासाद भवन- ग्राम, नगरस्य निर्माणयोजनायां निवेश्यभूमिचयनं भवनानामायुवयार्दानां दृष्टया भुपरीक्षा आधुनिकविकसितस्य एवं आदर्शनगरस्य आवश्यकतानुरूपं एवं आदर्शनगरस्य आवश्यकतानुरुपं विन्यासः कार्यः अर्थात् मुख्यमार्गाः उपमार्गाः वीथयः मन्दिर निर्माणम्, आपणम्, मनोरज्जनगृहाणि उद्यानानि पुस्तकालयाः , गुरुकुलानि उपाढशालाः चिकित्सालयाः, रक्षकस्थानं,वायुयानस्यस्थानं तथा रेलस्थानं कीडाङ्गणानि सैनिकवासः कारावासः वृक्षादीनां दी स्थापनार्थं समस्तनगरस्य निवेस्यभूम्याः पदविभाजनं आधुनिक कलानुसारं सुरक्षायाः उपायाः इत्यादीनां वास्तुशास्त्रीय सिद्धान्तानां यथासम्भवम् अनुपालनं कर्तुं शक्यते।

एतेन वास्तुविद्यामध्ये असुविदा असुखं चन भवते् इत्याशयः। मेन सह नगरस्य विभिन्नदिशोपदिशायां नगरस्य अन्तः एवं बहिः भिन्न भिन्न देवी देवतानाम् आयतनानि स्याप्यन्ते। नगरस्य सन्निवेशने नगरे एकस्यां दिशायां च एकस्मिन् भागे एकस्य एव वर्णस्य जनानां तथा एसमानां व्यवसाय कर्मोयजीविनामधिवासाः स्थाप्यन्ते।

जनव्यवस्था नार्गतं वापीकूप तडागदि जलशयानां निर्माणं जनानां प्राथमिक प्रथममावश्यकतायाः पूर्त्यर्थं भवति स्म।

जलाशयानामाश्रित स्थलेषु वा नगरे अन्य भिन्न- भिन्न- स्थलेषु आरामोद्यानानां जलोद्यानानां वाटिकानां स्थापने विविध वृक्षणां वपनं क्रियते तथा देवमन्दिरे विविध देवानां मूर्तयः स्थाप्यन्ते भिन्न भिन्नमदिराणां , भवनादीनां रचना एवं विशिष्टकृति प्रदानार्थ शिल्पः मुखः आसीत्। शिन्ल्पिनः लोके चतुर्धा वर्तन्ते। स्थपतिः सूत्रग्राही वर्धको ताक्षक। एतेषा चतुर्णां स्थपतिः मुख्यः शिल्पी आसीत्। सूत्रग्रहो, वर्धको तक्षकञ्च तस्य आज्ञानुसारिणां भवन्ति स्म।

एते चतुर्धा शिल्पिनः स्व-स्वकर्मणि निपुणः सन्ति। तैः सह सः ज्ञानी जितेन्द्रियः, चारित्र्यशीलः धार्मिकः सदाचारो सुशीलः इति ग्रणैः युक्तः भवेत इति आवश्यकमस्ति। स्थपतीनां कृते शास्त्रज्ञानेन सह तस्य अनुरुपरचनाकार्ये निपुणता, प्रत्युत्पन्न स्य ज्ञानमायिगुणाः अपि अनिवार्याः सन्ति।

स्थापत्यशास्त्रस्य ज्ञानस्पतिरिक्तं सामुद्रिकशास्त्रस्य गणितस्य, ज्योतिषस्य शिल्प यन्त्रकुर्मविधेः ज्ञानं अष्टाङ्गस्थापत्यस्य ज्ञानमपि परमावश्यकमस्ति। स्थापितः नानाविधग्रणैः युक्तः एवं वास्तुकर्मणि निपुणः सूत्रग्राही, वर्धकी, तक्षकश्च भवेत इति आवश्यकमस्ति। एतेषां परमपूज्यभावसहिता महता इति समाजे वर्तते।

वाास्तुनिर्माणात् प्राक परिगृहीतभूमौ दिग्ज्ञानस्याधारेण वास्तुशास्त्र-पदमण्डलस्य प्रकल्पनं, तथा वास्तुपुरुषस्य अवस्थित्याः कल्पनं वास्तुशास्त्रस्य प्रथमः सिद्धान्त एवं भारतीयवास्तुकलायाः परम्परा अस्ति। अस्माकं विशिष्ट- अध्ययनस्य आधारभूते ग्रन्थे वास्तुशास्त्रस्य तथा ज्यौतिषशास्त्रस्य मध्ये विविधप्रकारस्य वास्तुविद्याधारेण भिन्न भिन्न विषयाणां ज्ञानं प्राप्येत।

वास्तुकर्मणि वास्तुपटमण्डलस्य दिग्ज्ञानस्य वास्तुपुरुषाविकल्पनस्य इत्यादीनां ज्ञानं तु भवति, परंतु यदा-मान-प्रमाणस्य ज्ञानं न भवेत् तदा किमपि वास्तुशास्त्रकर्मशकयमस्ति। अतः पृथक् पृथक् अङ्गोपाङ्गानां सुन्दर-रचनायाः प्रकल्पना मानस्याभावे कथं भवति। तथा च प्राचीनकाले पद्यपि पृथक्- पृथक् वास्तुकर्म सिद्धयर्थं भिन्न भिन्नमानोपकरणानि प्रचलिचानि आसन् भिन्न-भिन्न मन्दिराणां, देवनिवासस्थानानि, देवविहार-स्थानानि देवमन्दिरनिर्माण-योग्यभूमिः, देवालयेवास्तुपुरुषलक्षणं द्वारविभागश्च, देवप्रासाद्विदानम् तथा देवप्रासादानां नामानि, मेरुमन्दरकैलासानां लक्षणम् विमाननन्दनयोर्लक्षणम् समुद्रपद्मयोर्लक्षम्,

गरुडनन्दिवर्धनकुन्चरगृहरजवृषहंसघटीनां, सर्वतोभद्-प्रसाद सिंहवृत्त चतुषकोणषोड-शाश्यष्टा श्रीणंलक्षणम् तथा प्रतिमालक्षणाध्याये परमाणुप्रमाणज्ञानम्, अङ्गलप्रमाणज्ञानम्, प्रतिमाप्रमाणम्, प्रतिमायाअवयवप्रमाणम्, वशिष्ठमतेन प्रतिमानिर्माण प्रकारः नग्नजिन्मतेन प्रतिमानिर्माण प्रकारः, प्रतिमास्वस्यप्रदर्शनम् प्रतिमानांविशेषलक्षणम्- विष्णुप्रतिमास्वरूपम् हलधरवलदेव प्रतिमास्वरूपम्, एकानंशाप्रतिमास्वरूपम् तथा साम्ब-प्रद्युन्नप्रतिमास्वरूपम्, ब्राह्मण कुमारस्य च प्रतिमास्वरूपम् इन्द्रप्रतिमास्वरूपम् शिवप्रतिमास्वरुपम् जिनप्रतिमा, बुद्धिप्रतिमा-सूर्यप्रतिमा-सूर्यमुदिश्य सर्वप्रतिमानां शुभाशुभत्वम्- शिवलिङ्गनिर्माणं स्थापन-प्रकारश्च तथाय अदिहितशिवलिङ्ग, स्थापने दोयाः मातृग्रहप्रतिमास्वरूपम् यमवरुणकुबेरप्रतिमा स्वरुपं तथा च गणेशप्रतिमास्वरुपम् तथा प्रतिमाप्रतिष्ठानाध्याये अधिवासने मणडपविधानम् काष्ठादिप्रतिमाफलम्, प्रतिमापूजनप्रकारः प्रतिमाप्रतिष्ठापनाधिकारी प्रतिष्ठासमयः स्थापत्य-विज्ञाने वास्तुकर्मणि भुरेव मुख्यवस्तु स्यात्। अतः भूपरिग्रहणस्य अतीव महत्त्वं वर्तते। प्राचीनकाले कस्यापि वास्तोः निर्माणात् प्राक् वास्तुविद्वज्जनैः भूजयनायं भूपरीक्षणमावश्यकं मन्यते। स्थलं परितो वातावरणं, सुरक्षा, भूम्याः सफलता मानवजीवने सः सम्बन्धिनां कतिपयमहत्त्वपूर्णबिन्दूनामुपरि विशेषरुपेण चिन्तनं क्रियन्ते स्म।, ब्राह्मणादिवर्णानां कृते क्रमशः श्वेताः, रक्ता, पीता, कृष्णा भूमिः उपयुक्ता मन्यते।

वास्तुशास्त्रस्य प्रायः सेर्व सम्बन्धिताः विषयाः बृहत्संहितायां वराहमिहिरायोर्यण समाविष्टाः। उपरिनिर्दिष्ट विषयानन्तरम् अनेके इतरे वास्तुविषयकाः विचारबिन्दवः निवेशिताः, दृश्यन्ते, यथा- दकार्गलविषयकं सूक्ष्मं निरुपणम्, वृक्षायुर्वेदाध्याये वृक्षारोपणेयोग्यभूमि-निरुपणम्, वृक्षारोपणसमयः , तस्य नियमाः , सेचनप्रकाराः, वृक्षाणा् रोपणनक्षत्राणि निरुपितानि।

अग्रे प्रासादलक्षणाध्यायो, प्रासादप्रशंसा, देवनिवासस्थानानि, देवमन्दिदनिर्माण-योग्यभूमिः, देवालये वास्तुपुरुषलक्षणाम्, वज्रलेमलक्षणांध्यायः, प्रतिमालक्षणाध्यायः, सूर्ये यमकुबेरवरुणादीनां प्रतिमास्वरुपम् इत्यादि विविधाः वास्तुविषयाः अत्र विवरणं प्रापिताः सन्ति।

**पाठं पाठं मिहिररचनां ज्यौतिषं वास्तुशास्त्रं**
**स्मारं स्मारं विशदविषयं साररूपेण धृत्वा।**
**विद्वद्वर्गप्रकटविभवं कुर्वती नम्रशीर्षा**
**धन्यान्वादान् विकिरति हृदा तुष्टचित्ता सुमित्रा।।१।।**

**भुवनं सर्वलोकानां निवासमन्दिरं बृहत्।**
**अग्नि कोळे स्थितं तत्र नमामि वास्तुदैवतम्।।२।।**